शास्त्री-II साहित्य

सूक्तिव्याख्याभागः- मेघदूतम् - उत्तरमेघः

Saathi

Date ___/___/___

प्र०(1)- कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा ।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।।

उत्तरम्- इयं सूक्तिः महाकविकालिदासप्रणीतस्य मेघदूतस्य खण्डकाव्यस्य उत्तरमेघस्यास्ति ।

प्रियाविरहदुर्बलः कुबेरानुचरो यक्षः स्वपत्न्यै सन्देशदान-प्रसङ्गे सुखदुःखयोरवश्यम्भावित्वं द्रढयितुं निर्दिशन्नाह - हे मेघ! अलकापुर्यां मदावासस्थितां मत्प्रियामासाद्य त्वयैतदभिधेयम् - "हे प्रिये सम्प्रत्यहं स्वयमेव धैर्यं धारयामि।" अतः हे कल्याणि! त्वमपि मातिकातरा भूः इह संसारे निरन्तरं कः सुखं दुःखं वाऽधिजगे । अर्थात् न कोऽपीत्यर्थः।" एतमेव भावं द्रढयन्नाह यक्षः - इह = संसारे, कस्य = कस्य पुरुषस्य, अत्यन्तं = नित्यं, सुखं = आनन्दः, दुःखं = व्यथा, उपगतं = प्राप्तम् । किन्तु दशा = अवस्था, चक्रनेमिक्रमेण = रथाङ्गाराक्रमेण, नीचैः = अधः, उपरि च = ऊर्ध्वञ्च, गच्छति = प्रचलति, चक्राङ्गारावत् प्राणिनः सुखदुःखे पर्यावर्तेते नैकान्ततो हि कस्यापि सुखं दुःखं वा भवितुमर्हतीत्यर्थः ।

Renu Devi
09/09/20
राधा उमाकांत सं० महावि० सुखसेना,
पूर्णिया ।

Page No.

उपशास्त्री - I साहित्य - तृतीय - पत्रम्

किरातार्जुनीयम् - प्रथमः सर्गः

Saathi

Date __ / __ / ____

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधिमण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीयम् महाकाव्यस्य प्रथमसर्गात् उद्धृतोस्ति।

प्रस्तुत श्लोके वनेचरः युधिष्ठिरं प्रति

भावार्थ: - कथयति - हे राजन! सर्वान् भूपालान् वशीकृत्य निश्चय भविष्यवान् सम्पूर्णभूमण्डलं प्रशासदपि स दुर्योधनः त्वत्तः आशंकमानो न सुखेन स्थातुं शक्नोति। अहो बलवद्भिः सह विरोधभावः दुष्परिणामो भवति।

हिन्दी - समग्र राजाओं को वश में करके अपने भविष्य को निश्चित कर लेने पर और समुद्रपर्यन्त पृथ्वी का शासन करने पर भी दुर्योधन तुम से आनेवाली विपत्तियों से घबराया-सा रहता है ठीक ही है, बलवानों के साथ विरोध करने का परिणाम दुःखकर ही होता है। (यहाँ कविशिरोमणि भारवि ने वनेचर के मुख से 'अहो दुरन्ता बलवद्विरोधिता' कहवा कर दुर्योधन के सम्राटत्व को द्योतित करते हुए भी युधिष्ठिर को उससे बलवान कहलवाया है)

Renu Devi
09/09/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

Page No.

शास्त्री-I साहित्य

अभिज्ञानशाकुन्तलम्

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति॥

उत्तरम् — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके उपस्थितां शकुन्तलामालोक्य नृपो दुष्यन्तो निजमनसि विमृशति — या एषा दृश्यमाना परितः = सर्वतः धूसरे इति परिधूसरे = मलिने वसने = द्वे वस्त्रे उत्तरीयोपसंव्याने, अधरोत्तरवस्त्रे वस्त्रयुगलं वसाना = परिदधाना नियमक्षाममुखी नियमैः = व्रताद्यैः उपवासादिभिः क्षामं मुखं = वदनं यस्याः सा नियमक्षाममुखी, व्रतनियमाश्चरणादिशुष्कवदना धृता एका वेणी यया सा धृतैकवेणिः। एकवेणी धारिणी जटीभूतकेश धारिणी। अत्र विशेषणत्रयेण विरहव्रत स्वरूपमुक्तम्। इतोमुखमागच्छन्ती सा इयं शुद्धशीला — शुद्धं निष्कलङ्कं शीलं स्वभावो यस्याः सा शुद्धशीला = साध्वी सदाचारा शकुन्तला = मुनिदुहिता अतिनिष्करुणस्य = अतिनिर्दयस्य सुतरां क्रूरस्य मम दीर्घं = बहुकालं विरहस्य व्रतं विरहोचितमाचारं बिभर्ति = धारयति।

अयं भावः — परिधूसरं युगलवस्त्रं परिदधानां व्रतनियमादिभिः कृशाङ्गीं केवलामेकवेणीं धारयन्ती सरल स्वभावां शकुन्तलामालोक्य राजा दुष्यन्त आत्मनोऽतिनिर्दयत्वं विचारयति। एतादृशीयमतिकठोरहृदयस्यैव मम कारणादेतादृशं विरहिणीव्रतं बिभर्तीति नूनमहं सापराध इति भावः। अत्र स्वभावोक्ति काव्यलिङ्गालङ्कारौ मालभारिणी वृत्तञ्च।

Renu Devi
09/09/20
राधा उमाकान्त सं० महाविद्यालय सुखसेना, पूर्णिया।